# Paramarthasara by Abhinavagupta

# શ્રીમદભિનવગુપ્તપ્રણીતઃ પરમાર્થસારઃ

## Document Information

Text title : Paramarthasarah Abhinavagupta

File name : paramArthasAraabhinavagupta.itx

Category : major_works, abhinavagupta, , kAshmIrashaivadarshanam

Location : doc_z_misc_major_works

Author : Abhinavagupta

Transliterated by : Suryansu Ray suryansuray at yahoo.com

Proofread by : Suryansu Ray suryansuray at yahoo.com

Latest update : September 23, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Paramarthasara by Abhinavagupta

# શ્રીમદભિનવગુપ્તપ્રણીતઃ પરમાર્થસારઃ

॥ ૐ નમશ્ચિદાત્મપરમાર્થવપુષે ॥

અથ શ્રીમન્મહામાહેશ્વરાચાર્યવર્યશ્રીમદભિનવગુપ્તાચાર્યવિરચિતઃ
પરમાર્થસારઃ ।
પરં પરસ્થં ગહનાદનાદિમેકં નિવિષ્ટં બહુધા ગુહાસુ ।
સર્વાલયં સર્વચરાચરસ્થં ત્વામેવ શમ્ભું શરણં પ્રપદ્યે ॥ ૧॥

ગર્ભાધિવાસપૂર્વકમરણાન્તકદુઃખચક્રવિભ્રાન્તઃ ।
આધારં ભગવન્તં શિષ્યઃ પપ્રચ્છ પરમાર્થમ્ ॥ ૨॥

આધારકારિકાભિસ્તં ગુરુરભિભાષતે સ્મ તત્સારમ્ ।
કથયત્યભિનવગુપ્તઃ શિવશાસનદૃષ્ટિયોગેન ॥ ૩॥

નિજશક્તિવૈભવભરાદણ્ડચતુષ્ટયમિદં વિભાગેન ।
શક્તિર્માયા પ્રકૃતિઃ પૃથ્વી ચેતિ પ્રભાવિતં પ્રભુણા ॥ ૪॥

તત્રાન્તર્વિશ્વમિદં વિચિત્રતનુકરણભુવનસન્તાનમ્ ।
ભોક્તા ચ તત્ર દેહી શિવ એવ ગૃહીતપશુભાવઃ ॥ ૫॥

નાનાવિધવર્ણાનાં રૂપં ધત્તે યથાઽમલઃ સ્ફટિકઃ ।
સુરમાનુષપશુપાદપરૂપત્વં તદ્વદીશોઽપિ ॥ ૬॥

ગચ્છતિ ગચ્છતિ જલ ઇવ હિમકરબિમ્બં સ્થિતે સ્થિતિં યાતિ ।
તનુકરણભુવનવર્ગે તથાઽયમાત્મા મહેશાનઃ ॥ ૭॥

રાહુરદૃશ્યોઽપિ યથા શશિબિમ્બસ્થઃ પ્રકાશતે તદ્વત્ ।
સર્વગતોઽપ્યયમાત્મા વિષયાશ્રયણેન ધીમુકુરે ॥ ૮॥

આદર્શે મલરહિતે યદ્વદ્વદનં વિભાતિ તદ્વદયમ્ ।
શિવશક્તિપાતવિમલે ધીતત્ત્વે ભાતિ ભારૂપઃ ॥ ૯॥

ભારૂપં પરિપૂર્ણં સ્વાત્મનિ વિશ્રાન્તિતો મહાનન્દમ્ ।

ઇચ્છાસંવિત્કરણૈર્નિર્ભરિતમનન્તશક્તિપરિપૂર્ણમ્ ॥ ૧૦॥

સર્વવિકલ્પવિહીનં શુદ્ધં શાન્તં લયોદયવિહીનમ્ ।
યત્પરતત્ત્વં તસ્મિન્વિભાતિ ષટ્ત્રિંશદાત્મજગત્ ॥ ૧૧॥

દર્પણબિમ્બે યદ્વન્નગરગ્રામાદિ ચિત્રમવિભાગિ ।
ભાતિ વિભાગેનૈવ ચ પરસ્પરં દર્પણાદપિ ચ ॥ ૧૨॥

વિમલતમપરમભૈરવબોધાત્તદ્વદ્વિભાગશૂન્યમપિ ।
અન્યોન્યં ચ તતોઽપિ ચ વિભક્તમાભાતિ જગદેતત્ ॥ ૧૩॥

શિવશક્તિસદાશિવતામીશ્વરવિદ્યામયીં ચ તત્ત્વદશામ્ ।
શક્તીનાં પઞ્ચાનાં વિભક્તભાવેન ભાસયતિ ॥ ૧૪॥

પરમં યત્સ્વાતન્ત્ર્યં દુર્ઘટસમ્પાદનં મહેશસ્ય ।
દેવી માયાશક્તિઃ સ્વાત્માવરણં શિવસ્યૈતત્ ॥ ૧૫॥

માયાપરિગ્રહવશાદ્બોધો મલિનઃ પુમાન્પશુર્ભવતિ ।
કાલકલાનિયતિબલાદ્રાગાવિદ્યાવશેન સમ્બદ્ધઃ ॥ ૧૬ ।
અધુનૈવ કિંચિદેવેદમેવ સર્વાત્મનૈવ જાનામિ ।
માયાસહિતં કઞ્ચુકષટ્કમણોરન્તરઙ્ગમિદમુક્તમ્ ॥ ૧૭॥

કમ્બુકમિવ તણ્ડુલકણવિનિવિષ્ટં ભિન્નમપ્યભિદા ।
ભજતે તત્તુ વિશુદ્ધિં શિવમાર્ગૌન્મુખ્યયોગેન ॥ ૧૮॥

સુખદુઃખમોહમાત્રં નિશ્ચયસંકલ્પનાભિમાનાચ્ચ ।
પ્રકૃતિરથાન્તઃકરણં બુદ્ધિમનોઽહઙ્કૃતિ ક્રમશઃ ॥ ૧૯॥

શ્રોત્રં ત્વગક્ષિ રસના ઘ્રાણં બુદ્ધીન્દ્રિયાણિ શબ્દાદૌ ।
વાક્પાણિપાદપાયૂપસ્થં કર્મેન્દ્રિયાણિ પુનઃ ॥ ૨૦॥

એષાં ગ્રાહ્યો વિષયઃ સૂક્ષ્મઃ પ્રવિભાગવર્જિતો યઃ સ્યાત્ ।
તન્માત્રપઞ્ચકં તચ્છબ્દઃ સ્પર્શો મહો રસો ગન્ધઃ ॥ ૨૧॥

એતત્સંસર્ગવશાત્સ્થૂલો વિષયસ્તુ ભૂતપઞ્ચકતામ્ ।
અભ્યેતિ નભઃ પવનસ્તેજઃ સલિલં ચ પૃથ્વી ચ ॥ ૨૨॥

તુષ ઇવ તણ્ડુલકણિકામાવૃણુતે પ્રકૃતિપૂર્વકઃ સર્ગઃ ।
પૃથ્વીપર્યન્તોઽયં ચૈતન્યં દેહભાવેન ॥ ૨૩॥

પરમાવરણં મલ ઇહ સૂક્ષ્મં માયાદિ કઞ્ચુકં સ્થૂલમ્ ।

બાહ્યં વિગ્રહરૂપં કોશત્રયવેષ્ટિતો હ્યાત્મા ॥ ૨૪॥

અજ્ઞાનતિમિરયોગાદેકમપિ સ્વં સ્વભાવમાત્માનમ્ ।
ગ્રાહ્યગ્રાહકનાનાવૈચિત્ર્યેણાવબુધ્યેત ॥ ૨૫॥

રસફાણિતશર્કરિકાગુડખણ્ડાદ્યા યથેક્ષુરસ એવ ।
તદ્વદવસ્થાભેદાઃ સર્વે પરમાત્મનઃ શમ્ભોઃ ॥ ૨૬॥

વિજ્ઞાનાન્તર્યામિપ્રાણવિરાડ્દેહજાતિપિણ્ડાન્તાઃ ।
વ્યવહારમાત્રમેતત્પરમાર્થેન તુ ન સન્ત્યેવ ॥ ૨૭॥

રજ્જ્વાં નાસ્તિ ભુજઙ્ગસ્ત્રાસં કુરુતે ચ મૃત્યુપર્યન્તમ્ ।
ભ્રાન્તેર્મહતી શક્તિર્ન વિવેક્તું શક્યતે નામ ॥ ૨૮॥

તદ્વદ્ધર્માધર્મસ્વર્નિરયોત્પત્તિમરણસુખદુઃખમ્ ।
વર્ણાશ્રમાદિ ચાત્મન્યસદપિ વિભ્રમબલાદ્ભવતિ ॥ ૨૯॥

એતત્તદન્ધકારં યદ્ભાવેષુ પ્રકાશમાનતયા ।
આત્માનતિરિક્તેષ્વપિ ભવત્યનાત્માભિમાનોઽયમ્ ॥ ૩૦॥

તિમિરાદપિ તિમિરમિદં ગણ્ડસ્યોપરિ મહાનયં સ્ફોટઃ ।
યદનાત્મન્યપિ દેહપ્રાણાદાવાત્મમાનિત્વમ્ ॥ ૩૧॥

દેહપ્રાણવિમર્શનધીજ્ઞાનનભઃપ્રપઞ્ચયોગેન ।
આત્માનં વેષ્ટયતે ચિત્રં જાલેન જાલકાર ઇવ ॥ ૩૨॥

સ્વજ્ઞાનવિભવભાસનયોગેનોદ્વેષ્ટયેન્નિજાત્માનમ્ ।
ઇતિ બન્ધમોક્ષચિત્રાં ક્રીડાં પ્રતનોતિ પરમશિવઃ ॥ ૩૩॥

સૃષ્ટિસ્થિતિસંહારા જાગ્રત્સ્વપ્નૌ સુષુપ્તમિતિ તસ્મિન્ ।
ભાન્તિ તુરીયે ધામનિ તથાપિ તૈર્નાવૃતં ભાતિ ॥ ૩૪॥

જાગ્રદ્વિશ્વં ભેદાત્સ્વપ્નસ્તેજઃ પ્રકાશમાહાત્મ્યાત્ ।
પ્રાજ્ઞઃ સુપ્તાવસ્થા જ્ઞાનઘનત્વાત્તતઃ પરં તુર્યમ્ ॥ ૩૫॥

જલધરધૂમરજોભિર્મલિનીક્રિયતે યથા ન ગગનતલમ્ ।
તદ્વન્માયાવિકૃતિભિરપરામૃષ્ટઃ પરઃ પુરુષઃ ॥ ૩૬॥

એકસ્મિન્ઘટગગને રજસા વ્યાપ્તે ભવન્તિ નાન્યાનિ ।
મલિનાનિ તદ્વદેતે જીઇવાઃ સુખદુઃખભેદજુષઃ ॥ ૩૭॥

શાન્તે શાન્ત ઇવાયં હૃષ્ટે હૃષ્ટો વિમોહવતિ મૂઢઃ ।
તત્ત્વગણે સતિ ભગવાન્ન પુનઃ પરમાર્થતઃ સ તથા ॥ ૩૮॥

યદનાત્મન્યપિ તદ્રૂપાવભાસનં તત્પુરા નિરાકૃત્ય ।
આત્મન્યનાત્મરૂપાં ભ્રાન્તિં વિદલયતિ પરમાત્મા ॥ ૩૯॥

ઇત્થં વિભ્રમયુગલકસમૂલવિચ્છેદને કૃતાર્થસ્ય ।
કર્તવ્યાન્તરકલના ન જાતુ પરયોગિનો ભવતિ ॥ ૪૦॥

પૃથિવી પ્રકૃતિર્માયા ત્રિતયમિદં વેદ્યરૂપતાપતિતમ્ ।
અદ્વૈતભાવનબલાદ્ભવતિ હિ સન્માત્રપરિશેષમ્ ॥ ૪૧॥

રશનાકુણ્ડલકટકં ભેદત્યાગેન દૃશ્યતે યથા હેમ ।
તદ્વદ્ભેદત્યાગે સન્માત્રં સર્વમાભાતિ ॥ ૪૨॥

તદ્બ્રહ્મ પરં શુદ્ધં શાન્તમભેદાત્મકં સમં સકલમ્ ।
અમૃતં સત્યં શક્તૌ વિશ્રામ્યતિ ભાસ્વરૂપાયામ્ ॥ ૪૩॥

ઇષ્યત ઇતિ વેદ્યત ઇતિ સમ્પાદ્યત ઇતિ ચ ભાસ્વરૂપેણ ।
અપરામૃષ્ટં યદપિ તુ નભઃપ્રસૂનત્વમભ્યેતિ ॥ ૪૪॥

શક્તિત્રિશૂલપરિગમયોગેન સમસ્તમપિ પરમેશે ।
શિવનામનિ પરમાર્થે વિસૃજ્યતે દેવદેવેન ॥ ૪૫॥

પુનરપિ ચ પઞ્ચશક્તિપ્રસરણક્રમેણ બહિરપિ તત્ ।
અણ્ડત્રયં વિચિત્રં સૃષ્ટં બહિરાત્મલાભેન ॥ ૪૬॥

ઇતિ શક્તિચક્રયન્ત્રં ક્રીડાયોગેન વાહયન્દેવઃ ।
અહમેવ શુદ્ધરૂપઃ શક્તિમહાચક્રનાયકપદસ્થઃ ॥ ૪૭॥

મય્યેવ ભાતિ વિશ્વં દર્પણ ઇવ નિર્મલે ઘટાદીનિ ।
મત્તઃ પ્રસરતિ સર્વં સ્વપ્નવિચિત્રત્વમિવ સુપ્તાત્ ॥ ૪૮॥

અહમેવ વિશ્વરૂપઃ કરચરણાદિસ્વભાવ ઇવ દેહઃ ।
સર્વસ્મિન્નહમેવ સ્ફુરામિ ભાવેષુ ભાસ્વરૂપમિવ ॥ ૪૯॥

દ્રષ્ટા શ્રોતા ઘ્રાતા દેહેન્દ્રિયવર્જિતોઽપ્યકર્તાપિ ।
સિદ્ધાન્તાગમતર્કાંશ્ચિત્રાનહમેવ રચયામિ ॥ ૫૦॥

ઇત્થં દ્વૈતવિકલ્પે ગલિતે પ્રવિલઙ્ઘ્ય મોહનીં માયામ્ ।
સલિલે સલિલં ક્ષીરે ક્ષીરમિવ બ્રહ્મણિ લયી સ્યાત્ ॥ ૫૧॥

ઇત્થં તત્ત્વસમૂહે ભાવનયા શિવમયત્વમભિયાતે ।
કઃ શોકઃ કો મોહઃ સર્વં બ્રહ્માવલોકયતઃ ॥ ૫૨॥

કર્મફલં શુભમશુભં મિથ્યાજ્ઞાનેન સંગમાદેવ ।
વિષમો હિ સંગદોષસ્તસ્કરયોગોઽપ્યતસ્કરસ્યેવ ॥ ૫૩॥

લોકવ્યવહારકૃતાં ય ઇહાવિદ્યામુપાસતે મૂઢાઃ ।
તે યાન્તિ જન્મમૃત્યૂ ધર્માધર્માર્ગલાબદ્ધાઃ ॥ ૫૪॥

અજ્ઞાનકાલનિચિતં ધર્માધર્માત્મકં તુ કર્માપિ ।
ચિરસંચિતમિવ તૂલં નશ્યતિ વિજ્ઞાનદીપ્તિવશાત્ ॥ ૫૫॥

જ્ઞાનપ્રાપ્તૌ કૃતમપિ ન ફલાય તતોઽસ્ય જન્મ કથમ્ ।
ગતજન્મબન્ધયોગો ભાતિ શિવાર્કઃ સ્વદીધિતિભિઃ ॥ ૫૬॥

તુષકમ્બુકકિંશારુકમુક્તં બીજં યથાઙ્કુરં કુરુતે ।
નૈવ તથાણવમાયાકર્મવિમુક્તો ભવાઙ્કુરં હ્યાત્મા ॥ ૫૭॥

આત્મજ્ઞો ન કુતશ્ચન બિભેતિ સર્વં હિ તસ્ય નિજરૂપમ્ ।
નૈવ ચ શોચતિ યસ્માત્પરમાર્થે નાશિતા નાસ્તિ ॥ ૫૮॥

અતિગૂઢહૃદયગઞ્જપ્રરૂઢપરમાર્થરત્નસંચયતઃ ।
અહમેવેતિ મહેશ્વરભાવે કા દુર્ગતિઃ કસ્ય ॥ ૫૯॥

મોક્ષસ્ય નૈવ કિંચિદ્ધામાસ્તિ ન ચાપિ ગમનમન્યત્ર ।
અજ્ઞાનગ્રન્થિભિદા સ્વશક્ત્યભિવ્યક્તતા મોક્ષઃ ॥ ૬૦॥

ભિન્નાજ્ઞાનગ્રન્થિર્ગતસન્દેહઃ પરાકૃતભ્રાન્તિઃ ।
પ્રક્ષીણપુણ્યપાપો વિગ્રહયોગેઽપ્યસૌ મુક્તઃ ॥ ૬૧॥

અગ્ન્યભિદગ્ધં બીજં યથા પ્રરોહાસમર્થતામેતિ ।
જ્ઞાનાગ્નિદગ્ધમેવં કર્મ ન જન્મપ્રદં ભવતિ ॥ ૬૨॥

પરિમિતબુદ્ધિત્વેન હિ કર્મોચિતભાવિદેહભાવનયા ।
સંકુચિતા ચિતિરેતદ્દેહધ્વંસે તથા ભવતિ ॥ ૬૩॥

યદિ પુનરમલં બોધં સર્વસમુત્તીર્ણબોદ્ધૃકર્તૃમયમ્ ।
વિતતમનસ્તમિતોદિતભારૂપં સત્યસંકલ્પમ્ ॥ ૬૪॥

દિક્કાલકલનવિકલં ધ્રુવમવ્યયમીશ્વરં સુપરિપૂર્ણમ્ ।

બહુતરશક્તિવ્રાતપ્રલયોદયવિરચનૈકકર્તારમ્ ॥ ૬૫॥

સૃષ્ટ્યાદિવિધિસુવેધસમાત્માનં શિવમયં વિબુદ્ધ્યેત ।
કથમિવ સંસારી સ્યાદ્વિતતસ્ય કુતઃ ક્વ વા સરણમ્ ॥ ૬૬॥

ઇતિ યુક્તિભિરપિ સિદ્ધં યત્કર્મ જ્ઞાનિનો ન સફલં તત્ ।
ન મમેદમપિ તુ તસ્યેતિ દાર્ઢ્યતો ન હિ ફલં લોકે ॥ ૬૭॥

ઇત્થં સકલવિકલ્પાન્પ્રતિબુદ્ધો ભાવનાસમીરણતઃ ।
આત્મજ્યોતિષિ દીપ્તે જુહ્વજ્જ્યોતિર્મયો ભવતિ ॥ ૬૮॥

અશ્નન્યદ્વા તદ્વા સંવીતો યેન કેનચિચ્છાન્તઃ ।
યત્ર ક્વચન નિવાસી વિમુચ્યતે સર્વભૂતાત્મા ॥ ૬૯॥

હયમેધશતસહસ્રાણ્યપિ કુરુતે બ્રહ્મઘાતલક્ષાણિ ।
પરમાર્થવિન્ન પુણ્યૈર્ન ચ પાપૈઃ સ્પૃશ્યતે વિમલઃ ॥ ૭૦॥

મદહર્ષકોપમન્મથવિષાદભયલોભમોહપરિવર્જી ।
નિઃસ્તોત્રવષટ્કારો જડ ઇવ વિચરેદવાદમતિઃ ॥ ૭૧॥

મદહર્ષપ્રભૃતિરયં વર્ગઃ પ્રભવતિ વિભેદસમ્મોહાત્ ।
અદ્વૈતાત્મવિબોધસ્તેન કથં સ્પૃશ્યતાં નામ ॥ ૭૨॥

સ્તુત્યં વા હોતવ્યં નાસ્તિ વ્યતિરિક્તમસ્ય કિંચન ચ ।
સ્તોત્રાદિના સ તુષ્યેન્મુક્તસ્તન્નિર્નમસ્કૃતિવષટ્કઃ ॥ ૭૩॥

ષટ્ત્રિંશત્તત્ત્વભૃતં વિગ્રહરચનાગવાક્ષપરિપૂર્ણમ્ ।
નિજમન્યદથ શરીરં ઘટાદિ વા તસ્ય દેવગૃહમ્ ॥ ૭૪॥

તત્ર ચ પરમાત્મમહાભૈરવશિવદેવતાં સ્વશક્તિયુતામ્ ।
આત્મામર્શનવિમલદ્રવ્યૈઃ પરિપૂજયન્નાસ્તે ॥ ૭૫॥

બહિરન્તરપરિકલ્પનભેદમહાબીજનિચયમર્પયતઃ ।
તસ્યાતિદીપ્તસંવિજ્જ્વલને યત્નાદ્વિના ભવતિ હોમઃ ॥ ૭૬॥

ધ્યાનમનસ્તમિતં પુનરેષ હિ ભગવાન્વિચિત્રરૂપાણિ ।
સૃજતિ તદેવ ધ્યાનં સંકલ્પાલિખિતસત્યરૂપત્વમ્ ॥ ૭૭॥

ભુવનાવલીં સમસ્તાં તત્ત્વક્રમકલ્પનામથાક્ષગણમ્ ।
અન્તર્બોધે પરિવર્તયતિ ચ યત્સોऽસ્ય જપ ઉદિતઃ ॥ ૭૮॥

સર્વં સમયા દૃષ્ટ્યા યત્પશ્યતિ યચ્ચ સંવિદં મનુતે ।
વિશ્વશ્મશાનનિરતાં વિગ્રહખટ્વાઙ્ગકલ્પનાકલિતામ્ ॥ ૭૯॥

વિશ્વરસાસવપૂર્ણં નિજકરગં વેદ્યખણ્ડકકપાલમ્ ।
રસયતિ ચ યત્તદેતદ્વ્રતમસ્ય સુદુર્લભં ચ સુલભં ચ ॥ ૮૦॥

ઇતિ જન્મનાશહીનં પરમાર્થમહેશ્વરાખ્યમુપલભ્ય ।
ઉપલબ્ધૃતાપ્રકાશાત્કૃતકૃત્યસ્તિષ્ઠતિ યથેષ્ટમ્ ॥ ૮૧॥

વ્યાપિનમભિહિતમિત્થં સર્વાત્માનં વિધૂતનાનાત્વમ્ ।
નિરુપમપરમાનન્દં યો વેત્તિ સ તન્મયો ભવતિ ॥ ૮૨॥

તીર્થે શ્વપચગૃહે વા નષ્ટસ્મૃતિરપિ પરિત્યજન્દેહમ્ ।
જ્ઞાનસમકાલમુક્તઃ કૈવલ્યં યાતિ હતશોકઃ ॥ ૮૩॥

પુણ્યાય તીર્થસેવા નિરયાય શ્વપચસદનનિધનગતિઃ ।
પુણ્યાપુણ્યકલઙ્કસ્પર્શાભાવે તુ કિં તેન ॥ ૮૪॥

તુષકમ્બુકસુપૃથક્કૃતતણ્ડુલકણતુષદલાન્તરક્ષેપઃ ।
તણ્ડુલકણસ્ય કુરુતે ન પુનસ્તદ્રૂપતાદાત્મ્યમ્ ॥ ૮૫॥

તદ્વત્કઞ્ચુકપટલીપૃથક્કૃતા સંવિદત્ર સંસ્કારાત્ ।
તિષ્ઠન્ત્યપિ મુક્તાત્મા તત્સ્પર્શવિવર્જિતા ભવતિ ॥ ૮૬॥

કુશલતમશિલ્પિકલ્પિતવિમલીભાવઃ સમુદ્ગકોપાધેઃ ।
મલિનોઽપિ મણિરુપાધેર્વિચ્છેદે સ્વચ્છપરમાર્થઃ ॥ ૮૭॥

એવં સદ્ગુરુશાસનવિમલસ્થિતિ વેદનં તનૂપાધેઃ ।
મુક્તમપ્યુપાધ્યન્તરશૂન્યમિવાભાતિ શિવરૂપમ્ ॥ ૮૮॥

શાસ્ત્રાદિપ્રામાણ્યાદવિચલિતશ્રદ્ધયાપિ તન્મયતામ્ ।
પ્રાપ્તઃ સ એવ પૂર્વં સ્વર્ગં નરકં મનુષ્યત્વમ્ ॥ ૮૯॥

અન્ત્યઃ ક્ષણસ્તુ તસ્મિન્પુણ્યાં પાપાં ચ વા સ્થિતિં પુષ્યન્ ।
મૂઢાનાં સહકારિભાવં ગચ્છતિ ગતૌ તુ ન સ હેતુઃ ॥ ૯૦॥

યેઽપિ તદાત્મત્વેન વિદુઃ પશુપક્ષિસરીસૃપાદયઃ સ્વગતિમ્ ।
તેઽપિ પુરાતનસમ્બોધસંસ્કૃતાસ્તાં ગતિં યાન્તિ ॥ ૯૧॥

સ્વર્ગમયો નિરયમયસ્તદયં દેહાન્તરાલગઃ પુરુષઃ ।
તદ્ભઙ્ગે સ્વૌચિત્યાદ્દેહાન્તરયોગમભ્યેતિ ॥ ૯૨॥

એવં જ્ઞાનાવસરે સ્વાત્મા સકૃદસ્ય યાદૃગવભાતઃ ।
તાદૃશ એવ તદાસૌ ન દેહપાતેઽન્યથા ભવતિ ॥ ૯૩॥

કરણગણસમ્પ્રમોષઃ સ્મૃતિનાશઃ શ્વાસકલિલતાચ્છેદઃ ।
મર્મસુ રુજાવિશેષાઃ શરીરસંસ્કારજો ભોગઃ ॥ ૯૪॥

સ કથં વિગ્રહયોગે સતિ ન ભવેત્તેન મોહયોગેઽપિ ।
મરણાવસરે જ્ઞાની ન ચ્યવતે સ્વાત્મપરમાર્થાત્ ॥ ૯૫॥

પરમાર્થમાર્ગમેનં ઝટિતિ યદા ગુરુમુખાત્સમભ્યેતિ ।
અતિતીવ્રશક્તિપાતાત્તદૈવ નિર્વિઘ્નમેવ શિવઃ ॥ ૯૬॥

સર્વોત્તીર્ણં રૂપં સોપાનપદક્રમેણ સંશ્રયતઃ ।
પરતત્ત્વરૂઢિલાભે પર્યન્તે શિવમયીભાવઃ ॥ ૯૭॥

તસ્ય તુ પરમાર્થમયીં ધારામગતસ્ય મધ્યવિશ્રાન્તેઃ ।
તત્પદલાભોત્સુકચેતસોઽપિ મરણં કદાચિત્સ્યાત્ ॥ ૯૮॥

યોગભ્રષ્ટઃ શાસ્ત્રે કથિતોઽસૌ ચિત્રભોગભુવનપતિઃ ।
વિશ્રાન્તિસ્થાનવશાદ્ભૂત્વા જન્માન્તરે શિવીભવતિ ॥ ૯૯॥

પરમાર્થમાર્ગમેનં હ્યભ્યસ્યાપ્રાપ્ય યોગમપિ નામ ।
સુરલોકભોગભાગી મુદિતમના મોદતે સુચિરમ્ ॥ ૧૦૦॥

વિષયેષુ સાર્વભૌમઃ સર્વજનૈઃ પૂજ્યતે યથા રાજા ।
ભુવનેષુ સર્વદેવૈર્યોગભ્રષ્ટસ્તથા પૂજ્યઃ ॥ ૧૦૧॥

મહતા કાલેન પુનર્માનુષ્યં પ્રાપ્ય યોગમભ્યસ્ય ।
પ્રાપ્નોતિ દિવ્યમમૃતં યસ્માદાવર્તતે ન પુનઃ ॥ ૧૦૨॥

તસ્માત્સન્માર્ગેઽસ્મિન્નિરતો યઃ કશ્ચિદેતિ સ શિવત્વમ્ ।
ઇતિ મત્વા પરમાર્થે યથાતથાપિ પ્રયતનીયમ્ ॥ ૧૦૩॥

ઇદમભિનવગુપ્તોદિતસંક્ષેપં ધ્યાયતઃ પરં બ્રહ્મ ।
અચિરાદેવ શિવત્વં નિજહૃદયાવેશમભ્યેતિ ॥ ૧૦૪॥

આર્યાશતેન તદિદં સંક્ષિપ્તં શાસ્ત્રસારમતિગૂઢમ્ ।
અભિનવગુપ્તેન મયા શિવચરણસ્મરણદીપ્તેન ॥ ૧૦૫॥

ઇતિ શ્રીમહામાહેશ્વરાચાર્યાભિનવગુપ્તવિરચિતઃ પરમાર્થસારઃ ॥

Encoded and proofread by Suryansu Ray

*Paramarthasara by Abhinavagupta*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*